कार्यं तु नास्य भवतीति विशेषः । [1]नलः, [2]नालः, [3]नलः ।

## (667) "णश अदर्शने"

(IV-दिवादिः-1194. अक. सेट्. पर.) रधादिः ।

नाशकः-शिका, नाशकः-शिका, [4]निनशिषकः-षिका-[5]निनङ्क्षकः-क्षिका, नानशकः-शिका ;

[6]नशिता-त्री-प्रनंष्टा-ष्ट्री, नाशयिता-त्री, निनशिषिता-त्री-निनङ्क्षिता-त्री, नानशिता-त्री ;

नश्यन्-[A]प्रणश्यन्-न्ती, नाशयन्[7]-न्ती, निनशिषन्-निनङ्क्षन्-न्ती ; —

नशिष्यन्-[8]प्रनङ्क्ष्यन्-न्ती-ती, नाशयिष्यन्-न्ती-ती, निनशिषिष्यन्, निनङ्क्षिष्यन्-न्ती-ती ; —

— — — नानश्यमानः, नानशिष्यमाणः ;

[9]प्रनट्-प्रनक्-प्रणशौ-प्रणशः ; — — —

---

1. शत्रून् नलति=बध्नातीति **नलः**=नृपतिविशेषः । कर्तरि पचाद्यच् ।
2. 'हलश्च' (3-3-121) इति संज्ञायां घञ् । **नालः**=बिसतन्तुः ।
3. नल्यते इति **नलः**=गन्धविशेषः । [**नलदम्**=लामजकम् ।]
4. '**रधादिभ्यश्च**' (7-2-45) इति वलादेरार्धधातुकस्येटो वैकल्पिकत्वात् इट्पक्षे रूपम् । एवम् इट्पक्षे सन्नन्ते सर्वत्र ज्ञेयम् ।
5. इडभावपक्षे, 'मस्जिनशोर्झलि' (7-1-60) इति नुमागमे, 'व्रश्च—'(8-2-36) इत्यादिना शकारस्य षत्वे, 'षढोः कः सि' (8-2-41) इति कत्वे, 'नश्चापदान्तस्य झलि' (8-3-24.) इत्यनुस्वारे, 'इण्कोः' (8-3-57) इति सनः सकारस्य षत्वे, 'अनुस्वारस्य ययि—' (8-4-58) इति परसवर्णे च रूपम् । एवम् इडभावपक्षे सन्नन्ते प्रक्रिया सर्वत्र बोध्या ।
6. रधादित्वादिड्विकल्पः । इडभावपक्षे, '**नशेः** षान्तस्य' (8-4-36) इति णत्वनिषेधः । एवं तव्यदादिष्वपि ज्ञेयम् ।
7. 'बुधयुधनशजनेङ्प्रुद्रुस्रुभ्यो णेः' (1-3-86) इति ण्यन्तात् शतृप्रत्यय एव भवति । न त्वात्मनेपदं शानच् ।
8. '**नशेः** षान्तस्य' (8-4-36) इत्यत्र अन्तग्रहणसामर्थ्यात् भूतपूर्वषकारान्तस्यापि ग्रहणमिति, णत्वमत्रापि न ।
9. क्विपि, 'व्रश्च—' (8-2-36) इति षत्वे, '**नशेर्वा**' (8-2-63) इति कुत्वविकल्पः । भूतपूर्वगत्या षकारान्तत्वात् णत्वं न ।

A. '**प्रणश्यन्नपि** नाशक्नोदत्येतुं बाणगोचरम् ।' भ. का. 9.134.